# भारतीय-विद्या-भवनम्, मुम्बई-७

(सरल - संस्कृत - परीक्षा - विभाग:)

## संस्कृत-परिचय:

## SAMSKRITA PARICHAYA

प्रथमं प्रश्नपत्रम् – First Paper

(समय: २.०० त: ४.३०) (पूर्णांका: ५०)

प्र.१. अधोलिखितेषु श्लोकेषु द्वयो: भावार्थं हिन्द्या/आंग्लभाषया/माध्यमभाषया वा लिखत । १०

(१) सर्वद्रव्येषु विद्यैव द्रव्यमाहुरनुत्तमम् ।
अहार्यत्वात् अनर्घ्यत्वात् अक्षयत्वाच्च सर्वदा ।।

(२) अतिष्ठन्मनुजेन्द्राणां मूर्ध्नि देवपतिर्यथा ।
उपर्युपरि सर्वेषां आदित्य इव तेजसा ।।

(३) महाजनस्य संसर्ग: कस्य नोन्नतिकारक: ।
पद्मपत्रस्थितं वारि धत्ते मुक्ताफलश्रियम् ।।

प्र.२. केषाञ्चित् पञ्चानां प्रश्नानामुत्तराणि संस्कृतेन लिखत । ५

(१) गंगा-यमुना-ब्रह्मपुत्रादीनां उद्गमस्थानं कुत्र अस्ति ?

(२) शंकरस्य भार्याया: नाम किम् ?

(३) दधि-घृत-तक्रादीनां निर्माणं कथं भवति ?

(४) पुरा जनानां मुख्यं धनं किम् आसीत् ?

(५) कस्य वृक्षस्य शाखा न भवति ?

(६) कस्य नाम दैवी वाक् ?

प्र.३. निम्नलिखितस्य परिच्छेदस्य हिन्द्या/आंग्लभाषया/माध्यमभाषया वा अनुवादं कुरुत । १०

सीते, त्वं कुलीना धर्मनिरता च सदा असि, अत: त्वमिहैव स्वधर्मं समाचर, येन मम मनसि सुखं भवेत् । वनं हि बहुदोषम् । तत्र सिंहानां व्याघ्राणां च दु:खदा निनादा:, सरित: सग्राहा:, मत्ता: गजा: कण्टकिता: लताश्च । मार्गा: अपि निरपा: सुदु:खाश्च ।

प्र.४. अधोलिखितानां लोकोक्तीनामर्थं हिन्द्या/आंग्लभाषया/माध्यमभाषया वा लिखत । ५

(१) अतिप्रवृद्धा शाल्मली वारणस्तम्भो न भवति ।

(२) अयमपरः क्षते क्षारावसेकः ।

(३) असहायः पथि न गच्छेत् ।

(४) अस्य पापोदरस्याऽर्थे किमनाटि न नाटकम् ?

(५) अतिमात्रोपहासस्तु कलहाय प्रकल्पते ।

प्र.५. (अ) बहुव्रीहि-समासस्य अर्थं सोदाहरणं लिखत । ४

(आ) निम्नलिखितानां विग्रहवाक्यानि लिखत । ३

(१) मेघश्यामः (२) वीरभीतः (३) राजर्षिः ।

(इ) 'सर्व'-शब्दस्य पुँल्लिङ्गे सर्वविभक्तिरूपाणि लिखत । ३

प्र.६. स्वोत्तरभाषया अनुवादं कुरुत । ५

(१) तस्मिन् गृहे बहवः मूषकाः सन्ति ।

(२) अनवरतं वायुः वाति ।

(३) मित्रम् अनादृत्य न सुखं प्राप्नोति कोऽपि ।

(४) मातरं प्रणम्य रामः कुत्र जगाम ?

(५) वैदेही रामेण सार्धं वनगमनाय किमर्थमैच्छत् ?

प्र.७. संस्कृतभाषया अनुवादं कुरुत । ५

(१) मैं गाय का दूध पीता हूँ ।
I drink cow's milk.

(२) सदैव मीठी वाणी बोलो ।
Speak sweet words all the time.

(३) सबको भोजन खिलाओ ।
Feed meals to all.

(४) तू क्यों रोता है ।
Why do you cry ?

(५) मैं ईश्वर का चिन्तन करता हूँ ।
I meditate on God.

* * *

# भारतीय-विद्या-भवनम्, मुम्बई-७

(सरल - संस्कृत - परीक्षा - विभागः)

## संस्कृत-परिचयः

## SAMSKRITA PARICHAYA

द्वितीयं प्रश्नपत्रम् – **Second Paper**

(समयः १०.३० तः १.००) (पूर्णांकाः ५०)

प्र.१. अधस्तनेषु श्लोकेषु द्वयोः भावार्थं स्वोत्तरभाषायां हिन्द्यां वा लिखत । १०

अरोगं सर्वसिद्धार्थमयोध्यां पुनरागतम् ।
पश्यामि त्वां सुखं वत्स सुस्थितं राजवर्त्मनि ।।१।।

नाकाले विहितो मृत्युर्मर्त्यानां पुरुषर्षभ ।
यत्र कान्ता त्वयोत्सृष्टा मुहूर्तमपि जीवति ।।२।।

सम्पत्तौ कोमलं चित्तं साधोरापदि कर्कशम् ।
सुकुमारं मधौ पत्रं तरोः स्यात्कठिनं शुचौ ।।३।।

प्र.२. अधस्तनस्य गद्यखण्डस्य हिन्द्यां स्वोत्तरभाषायां वा अर्थं लिखत । १०

ततः स अलसः बालकः अचिन्तयत् । अस्मिन् संसारे खगाः मृगाः कीटाः अपि अलसाः न सन्ति । अहमेव किमर्थम् अलसः भवामि इति । तदा सः पाठशालां गत्वा पाठान् अपठत्, अभवत् च पण्डितः । ततः स इमं श्लोकम् अपठत् -

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ।
नास्ति उद्यमसमो बन्धुः यं कृत्वा नावसीदति ।।

प्र.३. अधोलिखितानां लोकोक्तीनामर्थं स्वोत्तरभाषया लिखत । ५

(१) अनुरागोऽनुरागेण परीक्षितव्यः ।

(२) अनुकूले विधौ सर्वं जगदेति कृपालुताम् ।

(३) अतिदर्पात् हता लङ्का ।

(४) अङ्गीकृतं सुकृतिनः परिपालयन्ति ।

(५) अल्पमपि छललब्धं बहुसत्यार्जितमपि प्रदूषयति ।

**प्र.४. (क) एतेषां शब्दानामर्थं स्वभाषया विलिख्य तान् शब्दान् स्वीयसंस्कृतवाक्येषु संयोजयत ।** ४

त्वरमाणः, कथंचित्, पावकः, जीवितम् ।

**(ख) सन्धिविच्छेदं कुरुत ।** ४

नरेश्वरः, शस्त्राण्याजौ, पुनर्लोकान्, तथैव ।

**(ग) ''चन्द्रमस्''-शब्दस्य सर्वासु विभक्तिषु रूपाणि लिखत ।** ४

**(घ) विग्रहवाक्यानि लिखत ।** ४

वैनतेयः, दाशरथिः, वृक्षकः, अश्वकः ।

**(ङ) एतेषां प्रत्ययानां परिचयो देयः ।** ४

आट, मत्, ईय, इक।

**प्र.५. संस्कृतभाषायामनुवादं कुरुत ।** ५

(१) तुम रात का भोजन कब करते हो ?
When do you have your dinner ?

(२) आम किन दिनों में होते हैं ?
During which season do mangoes grow ?

(३) गाँव के लोग मोटे ताजे होते हैं ।
The villagers are healthy and fit.

(४) प्रातःकाल शीशे में अपना मुँह देखना चाहिए ।
One should see one's face in the mirror in the morning.

(५) गाँव के लोग कटोरों में दूध पीते हैं ।
The villagers drink milk in bowls.

* * *

# भारतीय-विद्या-भवनम्, मुम्बई-७

(सरल - संस्कृत - परीक्षा - विभाग:)

## संस्कृत-परिचय:

## SAMSKRITA PARICHAYA

तृतीयं प्रश्नपत्रम् – Third Paper

(समय: २.०० त: ४.३०) (पूर्णांका: ५०)

**प्र.१. हिन्द्या/आंग्लभाषया/माध्यमभाषया वा त्रयाणां टिप्पणी: लिखत ।** १५

(१) साहित्यस्यार्थ: (२) पुराणानि (३) रामायणम् (४) महाभारतम् ।

**प्र.२. स्वभाषया पञ्चानामर्थो लेख्य: ।** १०

(१) धिक्कंलत्रपुत्रकम् । (२) द्रव्येण सर्वे वशाः । (३) दुर्बलस्य बलं राजा । (४) दैवाधीनं त्यजेद् भावि । (५) जलबिन्दुनिपातेन क्रमश: पूर्यते घट: ।

**प्र.३. पञ्चानां वाक्यानां शुद्धि: विधेया ।** ५

(१) इमं पुस्तकमस्ति । (२) मयि पुस्तकं देहि । (३) तव मित्र: क: अस्ति ? (४) वने हस्ति: धावति । (५) देवदत्त: गच्छन्ति । (६) रामस्य नम: ।

**प्र.४. (अ) स्वजनकमुद्दिश्य पत्रं लिखत ।** ५

**(आ) कस्यचिदेकस्य छन्दस: लक्षणमुदाहरणञ्च लिखत ।** ५

(१) वसन्ततिलका (२) उपेन्द्रवज्रा (३) भुजङ्गप्रयातम् ।

**प्र.५. कमपि एकमाश्रित्य संस्कृतभाषया एको निबन्धो लेखनीय: ।** १०

(१) भारतवर्ष: (२) हिमालय: (३) कृषक: ।

* * *